# Tiruchendura Shri Sendiladhipan SuprabhAtam

# तिरुचेन्दूर श्री सेन्दिलाधिपन् सुप्रभातम्

## Document Information

Text title : Tiruchendura Sendiladhipan Suprabhatam

File name : tiruchendUrasendilAdhipansuprabhAtam.itx

Category : subrahmanya, suprabhAta

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan Iyer

Proofread by : Sivakumar Thyagarajan Iyer, Aruna Narayanan, PSA Easwaran

Latest update : July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# तिरुचेन्दूर श्री सेन्दिलाधिपन् सुप्रभातम्

ॐ श्रीगणेशाय नमः ।

वन्दे वन्दारुमन्दारमिन्दुभूषणनन्दनं
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ।
षड्वक्त्र कृत्तिकापुत्र षट्चक्रस्थ कृपानिधे
उत्तिष्ठाभीष्टवरद कर्त्तव्यं लोकरक्षणम् ॥ १॥

उत्तिष्ठोत्तिष्ठ गाङ्गेय उत्तिष्ठ श्रुतिसंस्तुत ।
उत्तिष्ठ सर्वदेवेश त्रैलोक्यं मङ्गळं कुरु ॥ २॥

सुप्रातमस्तु शशिचूडतनूद्भवाय
सुप्रातमस्तु शरणागतवत्सलाय ।
सुप्रातमस्तु शरदिन्दुसमाननाय
सुप्रातमस्तु शबरेन्द्रसुताप्रियाय ॥ ३॥

सुप्रातमस्त्वसुरकुलान्तकाय
सुप्रातमस्तु शमलापहदिव्यनाम्ने ।
सुप्रातमस्तु शरशक्तिधनुर्धराय
सुप्रातमस्तु शरसम्भव सुप्रभातम् ॥ ४॥

श्रीवेदसूक्तसकलागममन्त्ररूप
श्रीकार्तिकेय कमलानन तारकारे ।
श्रीसिन्धुतीरविलसत् सुगुहानिवास
श्रीगन्धमादनपते तव सुप्रभातम् ॥ ५॥

षट्कोणमध्यविलसत् प्रणवस्वरूप
षड्भावनाशक षडानन षट्किरीट ।
षष्ठीव्रतप्रिय सुमङ्गळदिव्यमूर्ते
श्रीगन्धमादनपते तव सुप्रभातम् ॥ ६॥

श्रीस्कन्दपुष्करिणिका शुभतोयपूताः
    श्रीभस्मरुद्रमणिभूषितदिव्यगात्राः ।
त्वत्सन्निधौ प्रतिदिनं प्रविशन्ति भक्ताः
    श्रीगन्धमादनपते तव सुप्रभातम् ॥ ७॥

श्रीकुम्भसम्भवशुकप्रमुखा मुनीन्द्राः
    श्रीपारिजातकुसुमानि करे गृहीत्वा ।
श्रीपादपद्ममुभयं च सदार्चयन्ति
    श्रीगन्धमादनपते तव सुप्रभातम् ॥ ८॥

श्रीब्रह्मविष्णुसुरनायकदेवमुख्याः
    त्वत्पादपद्ममधुरामृतपानहेतोः ।
द्वारे स्थिताः प्रतिदिनं निगमागमज्ञाः
    श्रीगन्धमादनपते तव सुप्रभातम् ॥ ९॥

सर्वार्थसाधक जयन्तिपुरीनिवासाः
    विप्रेन्द्रवर्यगणभक्तगणा महन्तः ।
त्वत्सन्निधौ प्रतिदिनं निवसन्ति सर्वे
    श्रीगन्धमादनपते तव सुप्रभातम् ॥ १०॥

शरसम्भव ते करुणाप्रथिता
    विधिशङ्करविष्णुमुखैर्विदिता ।
करुणालवभाग्यधि कश्चिदहो
    मनुजैस्सकलैर्नियतं विनुतः ॥ ११॥

शिवतातगिरा श्रुतितत्परता
    भवतस्सकलैर्विदिता हि भवान् ।
सुपलाश पलाशतते(?) प्रथमं
    हुतभोजिमुखान्तमहो कृतवान् ॥ १२॥

कलितः कलितं कलुषं सकलं
    शरसम्भव हन्तुमहो भगवन् ।
शरजन्म भवान् गतवान् मतिमन्
    शरदिन्दुसमानमुखाम्बुरुहः ॥ १३॥

शिवनिन्दनसुस्त्रवतो विबुधा-
    दितिजैरघरूपधरैर्विधुताः ।

त्वदुपाश्रयतः पुनरप्यमरा
भवता सुखिता विहिता नियतम् ॥ १४॥

विधिना भवतश्शिशुता विदिता
परदानमदान्ममता जनिदात् ।
प्रणवार्थकृते भवदा तु पुनर्-
निजवीरवैरस्सवितिर्यमितः ॥ १५॥

मुनिभिः परिवारित भो भगवन्
स परात्मजयासुरराड्वधया ।
सहसाननया सहपादि भवान्
शिखिवाहन षण्मुख सर्वगुरो ॥ १७॥

शरणागतमातुरमादिजितं
करुणाकर कामद कामहतम् ।
शरकाननसम्भव चारुरुचे
परिपालय तारकमारक माम् ॥ १७॥

शरदिन्दुसमान षडाननया
सरसीरुह चारुविलोचनया ।
निरुपाधिकया निजबालतया
परिपालय तारकमारक माम् ॥ १८॥

हरसारसमुद्भव हैमवती-
करपल्लवलाळितकम्रतनो ।
मुरवैरिविरिञ्चिमुदं पुनिदे(?)
परिपालय तारकमारक माम् ॥ १९॥

गिरिजासुत सायकभिन्नगिरे
सुरसिन्धुतनूजसुवर्णरुचे ।
शिखिवाह शिखावल देव नमो
परिपालय तारकमारक माम् ॥ २०॥

परितो भव मे पुरतो भव मे
पति मे सततं गुह रक्ष च माम् ।
विदराजिषु(?) मे विजयं भवितुं
परिपालय तारकमारक माम् ॥ २१॥

जय विप्रजनप्रिय वीर नमो
    जय भक्तपरायण भद्र नमो ।
जय शाकविशाखकुमार नमो
    परिपालय तारकमारक माम् ॥ २२॥

एकं पक्षद्वयं साक्षात् त्रिमूर्तिश्च चतुष्फलम् ।
पञ्चस्कन्दं च षड्वाहं(?) सप्तत्वकु(?) परिपूरितम् ॥ २३॥

अष्टपुष्पं नवाक्षं च दशव्याप्तं महाद्भुतम् ।
एवमादिमहावृक्षं पालयन्तं गुहं भजे ॥ २४॥

इत्थं श्रीसुप्रभातं च  ये पठन्तीह मानवाः ।
ते सर्वे सर्वकामार्थाः प्रयान्ति गुहसन्निधौ ॥ २५॥

इति शुभम् ।

इति तिरुचेन्दूर श्री सेन्दिलाधिपन् सुप्रभातं सम्पूर्णम् ।

Encoded by Sivakumar Thyagarajan Iyer

Proofread by Sivakumar Thyagarajan Iyer, Aruna Narayanan, PSA Easwaran

*Tiruchendura Shri Sendiladhipan SuprabhAtam*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*